

# आधुनिक संदर्भों में भगवद्गीता की प्रासंगिकता

सम्पादक
डॉ. बाल कृष्ण प्रजापति
सह सम्पादक
डॉ. अनामिका प्रजापति

# आधुनिक संदर्भों में भगवद्गीता की प्रासंगिकता

ISBN NO : 978-93-92212-69-7

© सर्वाधिकार : सम्पादक

द्वितीय संस्करण : 11 नवम्बर 2015

मूल्य : 600/–

प्रकाशक
पहले पहल प्रकाशन, भोपाल
मो. 9425011789

मुद्रक
पहले पहल प्रिंटरी
25 ए प्रेस कम्पलेक्स, भोपाल
दूरभाष : 0755 – 2555789

इस पुस्तक को संकलित शोध पत्रों के आधार पर प्रकाशित किया गया है। किसी भी लेख में अभिव्यक्त मत के लिए लेखक स्वयं उत्तरदायी है। इसके लिए सम्पादक का कोई दायित्व नहीं होगा।

36- श्रीमद्गवदगीता में आत्म तत्त्व विवेचन — डॉ. सुष्मिता सक्सेना..........186

37- श्रीमद्भगवद्गीता और भारतीय समाज — डॉ. साधना गोयल..........193

38- श्रीमद्भगवद्गीता एवं धम्मपद में मोक्ष की अवधारणा — डॉ. सिद्धार्थ सोमकुवर, शहनाज परवीन..........196

39- गीता पर उपनिषद् साहित्य का प्रभाव — पंकज कुमार झा..........202

40- भगवद्गीता और भाववादी दर्शन — डॉ. हंसा व्यास, डॉ. असुन्ता कुजूर..........210

41- गीता और धम्मपद में ईश्वर की कल्पना — अनिता यादव..........214

42- श्रीमद्भगवद्गीता और पर्यावरण संरक्षण — अनिता दुबे..........219

43- श्रीमद्भगवद्गीता में भक्तियोग का तुलनात्मक विवेचन — वेदनारायण शुक्ल..........224

44- श्रीमद्भगवद्गीता का एक परिचय — मुकेश कुमार तिवारी..........230

45- भारतीय धर्म संस्कृति का आधार– श्री भगवद्गीता वर्तमान समय में प्रांसगिक है — डॉ. शकुन शुक्ला..........233

46- गीता की दार्शनिकता–सांख्य योग के संदर्भ में — सुशील कुमार गुप्त..........238

47- भूत और वर्तमान में भगवद्गीता की उपयोगिता — श्रीमती कुसुम चौधरी..........247

48- श्रीमद्भगवत्गीता का तात्त्विक विवेचन — डॉ. प्रीति सिरोठिया..........252

49- श्रीमद्भगवत्गीता का मनोवैज्ञानिक विश्लेषण — डॉ. दीपक कुमार पाठक..........259

50- गीता दर्शन का शैक्षिक महत्त्व — डॉ. ओमप्रकाश शास्त्री..........266

51- भारतीय ज्ञान परम्परा में गीता का महात्म्य — कु. रचना मेहरा..........272

52- वर्तमान संदर्भ में श्रीमद्भगवद्गीता की प्रासंगिकता — कु. सुनीता मेहर..........278

53- कृष्ण उवाच — डॉ. सोहन कुमार यादव..........282

54- प्रवर्तमानसमयेऽपि श्रीमद्भगवद्गीता आहारव्यवहारविषये सर्वथा प्रासङ्गिकी — डॉ. अमृतलाल भोगायता..........286

55- श्रीमद्भगवद्गीता में धर्म का स्वरूप — डॉ. मथुरा प्रसाद, निवेदिता बैनर्जी..........292

56- सामाजिकजगतः गीतायाः दार्शनिकता — बी. उमा महेश्वरी..........297

57- भगवद्गीता में दान की महत्ता — श्याम सुन्दर प्रजापति..........302

58- गीता में वर्णित मानसिक पर्यावरण — डॉ. प्रतिभा मरमट..........304

59- गीता : आत्म–साक्षात्कार की कसौटी — श्रीमती सुधा पाठक..........308

60- भारतीय ज्ञान परंपरा में गीता का महात्म्य — डोली रैकवार..........313

# सामाजिकजगतः गीतायाः दार्शनिकता

बी. उमा महेश्वरी
असि.प्रो. न्याय,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, गुजरातम्।

आधुनिकसमाजे बहवः एवं चिन्तयन्ति, यत् अस्माकं प्रति गीताशास्त्रस्य किमपि प्रयोजनं नास्ति इति। ये आध्यात्मिकजीवनं जिजीविषन्ति, ये वृद्धावस्थां प्राप्नुवन्ति तेषामेव गीताया आवश्यकता भवति। वयं तु लौकिकाः व्यावहारिकजीवनं यापयामः। व्यावहारिकाणां कृते आध्यात्मिकज्ञानस्य किं प्रयोजनं भवतीत्येवं मा चिन्तयेत्। श्रीकृष्णः गीताशास्त्रम् अर्जुनं प्रति युद्धरङ्गे उक्तवान्। अपि च युद्धनिवृत्तिमुखस्य अर्जुनस्य प्रवृत्तिप्रधानाय प्रबोधितवान्। न च युद्धमाध्यात्मिकरङ्गस्य अङ्गभूतम्, नापि युद्धप्रवृत्तिश्च। तस्मात् गीताशास्त्रम् आबालगोपालसहितसर्वमनुष्यमात्रैः पठनीयम्, पठितविषयं स्वजीवने आचरणीयञ्च। गीताशास्त्रे वेदादिसकलशास्त्रसारं निक्षिप्तमस्ति। सर्वमनुष्याणाम् आवश्यकविषयाः बहवः उपलभ्यन्ते।

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**
**पार्थोवत्ससुधीर्भोक्ता दुग्धं गीताऽमृतं महत्॥**

वेदादिसमस्तोपनिषदं गोरूपेण, श्रीकृष्णं दोहनकर्तारूपेण, अर्जुनं गोवत्सरूपेण विदुषः भोक्तारूपेण, गीताशास्त्रं क्षीररूपेण चात्र वर्णितमस्ति। गीताशास्त्रपठनेन सर्वशास्त्रज्ञानमवगतं भवति। अस्मत् जातीयपिता गान्धीमहोदयः सर्वदा गीताशास्त्रं समीपेस्थापयति स्म। क्लिष्टसमयेषु परिष्कारार्थं समाधानमन्विषति स्म। अस्मद्देशस्वातन्त्र्यविषये गीताशास्त्रोक्तदैवीसम्पदीयाऽहिंसानिनादो मुख्यभूमिकां दधार। श्री बालगङ्गाधरतिलक् महोदयः गीताशास्त्रोपरि कर्मसिद्धान्तदृष्ट्या व्याख्यानं व्याख्यातवान्। अन्ये बहवः व्यावहारिकलोके प्रसिद्धाः सिष्टजनाः स्वजीवने गीताशास्त्रज्ञानमाधारीकृत्य जीवन्ति स्म।

**"यद्यदाचरति श्रेष्ठः तत्तदेवेदरो जनः।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते"॥**

इति श्लोकस्य भावं मनसि धृत्वा निर्मलजीवनं जीवन्ति स्म। तदेव अस्माभिरपि आचरणीयमिति।

प्रथमं विद्यार्थिनां प्रति किमुक्तमिति विचारयामः। विद्यार्जनसमये विद्यार्थिनः संयमिनः भवेयुः। **"श्रद्धावान् लभते ज्ञानम्"** श्रद्धया एव ज्ञानस्य प्राप्तिर्भवति। अश्रद्धया विद्या नायाति। अत्र विद्या, ज्ञानं अभेदेन मन्तव्यम् यथा **'विद्-ज्ञाने'**। **"नहि ज्ञानेनसदृशं पवित्रमिहविद्यते"** अर्थात् विद्यासमं परमपवित्रं नान्यदस्ति इति। विद्यासहितजीवनेन मनुष्योऽपि परमपवित्रो भवति। **"स्वाध्यायज्ञानयज्ञाश्च"** विद्यार्जनं परमपवित्रयज्ञानुष्ठानेन सममुक्तम्। येन विदुषा विद्या प्राप्नोति तं प्रणमेत् सदा। पाठ्यांशे संशयः वर्तते चेत् विनयेन प्रश्नः प्रष्टव्यः। अवसरकाले सेवयापि तं तोषयेत् इति। **"तद्विद्धिप्रणिपातेन परिप्रश्नेन सेवया"** इति। **"विद्या विनयसम्पन्ने"** विद्यार्जनानन्तरं अहङ्कारम् आगच्छति। तं त्यजेत्। तस्माद्विनयसम्पन्नाविद्या एव सार्थवती भवति। **"अज्ञश्चाश्रद्धदानश्च संशयात्मा विनश्यति"** पाठ्यविषयेषु अज्ञानता अश्रद्धता, संशयता न भवेत्। यदि भवति तर्हि सुष्टु विद्यापारङ्गतो न भवति। **"तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्"** अर्थात् मेधावी विध्यार्थी मन्दबुद्धिसहपाठिनः दुःखं न जनयेत्। तं न विचालयेत्।

**"अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते"॥**

विद्याभ्यासोऽपि एकप्रकारकं तप इत्यवोचत्। परस्परसम्भाषणवेलायां सर्वदा वाक्यम् उद्वेगरहितं, सत्यं, प्रियं, हितकरं च भवेत्। तदा तपसा सदृशः विद्याऽभ्यासो भवति।

**"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**
**शुनि चैव श्वपाके च पण्डितास्समदर्शिनः"॥**

अत्र श्रीकृष्णेन अस्पृश्यरहितपूर्वकं महद्वाक्यम् असमत्वस्य कुठारघातवत् उद्बोधितवान्। षडङ्गसहितवेदाध्यायी ब्राह्मणे, गवि, हस्तिनि,





शुनके, श्वपाके च सर्वेषु समत्वभावेन वर्तेत । समाजेऽस्मिन् श्वपाक (शुनकमांसभक्षणं यः करोति सः श्वपाकः) इति परमनिकृष्टरूपेण जुगुप्सन्ते स्म। तत्सुतरां निराकरोति श्रीकृष्णः। अन्यत्र –**"आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन"** अर्थात् प्रतिपुरुषम् आत्मसदृशं पश्येत् नान्यत् इति। **"समोहं सर्वभूतेषु"** इति भगवत्तत्वं सर्वमनुष्येषु समानरूपेण भवतीति विषमतादृष्टिं तरतमभेदञ्च सम्पूर्णतया निवारितवान्।

गीताशास्त्रे कर्मविषये अनेकधा उक्तमस्ति। **'गहना कर्मणो गतिः'** इति कर्मविषयावगाहनमेव अति दुस्तरमिति उक्तम्। अर्जुनः मोहवशात् अधर्मरतान् स्वबन्धून् मारितुं न उद्युक्तो भवति। किन्तु स्वबन्धुरपि दुष्टश्चेत् शिक्षितव्यः, परोऽपि शिष्टश्चेत् रक्षितव्य इति नियमानुसारेण श्रीकृष्णः अर्जुनं प्रेरयति। **"कुर्याद्विद्वान् तथासक्तः चिकीर्षुर्लोकसङ्ग्रहम्"** । विवेकपुरुष आसक्तिरहितः लोककल्याणार्थं स्वकीयकर्म कुर्यात्। एतत् रक्षकशाखायां स्थित अधिकारिणां प्रति उच्यते। **"कथं भीष्ममहंसङ्ख्ये द्रोणञ्चमधुसूदन। इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन"॥** पूजनीयान् भीष्मपितामहं, अस्मदाचार्यं द्रोणञ्च कथमहं प्रत्यर्थिरूपेण युद्धं करिष्यामि इति। तदा कृष्णेनोच्यते—**"स्वधर्ममपिचावेक्ष्य नविकम्पितुमर्हसि। धर्म्याद्धियुद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते"** हे अर्जुन ! स्वधर्मदृष्ट्यापि न भयमाप्नोतुमर्हसि। क्षत्रियस्य धर्मयुध्दाद् श्रेष्ठकर्म अन्यत् न किञ्चिदस्ति। यदि धर्मयुध्दं न करिष्यसि ?,तर्हि तव शत्रुवर्गः युध्दात् भयकारणादुपरत इति बहूनि निन्दावाक्यैः तव सामर्थ्यमपि निन्दयन्ति। ततः बहुसमक्षे लाघवं यास्यसि। सर्वेषामपि अकीर्तिः मरणादतिरिच्यते । इतः परं दुःखतरं किं वर्तते !, तस्मात् कृतनिश्चयः युध्दाय उत्तिष्ठ युध्यस्व च । इदं ज्ञानम् आश्रित्यैव इन्दोरराज्ञी दुष्टं प्रजाऽहितकारिणं स्वपुत्रमपि हस्तिना ताडयित्वा निर्मोहेन मारितवति। सा राज्ञी अद्यापि कीर्त्यते जनैः । एतादृशाः राज्याधिकारिणः अस्मद्देशे बहवः आसन्। ते गीताशास्त्रम् अनुश्रुत्य राज्यं पालयन्ति स्म। अर्वाचीनाधिकारिणः अस्मत् शास्त्रावलोकनमपि न कुर्वन्ति । अत इमं विषयमज्ञात्वैव अनेकाधिकरिणः स्वबन्धुमोहेन इतरविषयेषु अनेकानि अनर्थकार्याणि कुर्वन्ति । स्वबन्धून् पापं कुर्वतामपि न शिक्षयन्ति । **"नियतं कुरु कर्म त्वं"** प्रभुत्वाधिकारिभिः स्व स्व नियमितकर्म धर्मेन कर्तव्यम् । रक्षकभटै

अधिकारिभिश्च अयं निजः परो वेति गनना विना निष्पक्षपातेन च दुष्टश्चेत् दण्डनीयः, शिष्टश्चेत् रक्षनीयः। **'दण्डो दमयतामस्मि'** इति निष्पक्षपातदण्डोऽपि साक्षाद् दैवीक्रिया एव। **"नरानाञ्च नराधिपम्"** इत्यनेन वाक्येन अधिकारिणं साक्षात् दैवीरूपेण अवोचत्। इदं ज्ञानं समाश्रित्य रामकृष्णादयोपि दैवत्वं प्राप्तवन्तः । **"नाविष्णुः पृथिवीपतिः"** इति अन्यत्र उक्तमस्ति । **"गीताज्ञानं समाश्रित्य त्रीन् लोकान् पालयाम्यहम्"** । गीताशास्त्रोक्तधर्ममनुश्रुत्य विशिष्टाधिकारिणः निर्मोहेन ममत्वरहितेन स्वार्थरहितेन समत्वभावेन च जनान् स्वपुत्रानिव पालयन्ति चेत् देववत् गौरवं प्राप्नुवन्ति।

**"कर्म ज्यायो ह्यकर्मणः"** प्रत्येकमनुष्येन कर्म करणीयम् । अकरणात् कर्मकरणं श्रेष्ठम् । कर्म अकरणे बहवः दोषाः उत्पद्यन्ते । यथा **"व्यवसायात्मिका बुध्दिरेकेह कुरुनन्दन। बहुशाखाह्यनान्ताश्च बुध्दयोऽव्यवसायिनाम्"** ॥ कर्मशीलस्य बुध्दि एकनिश्चयात्मिका भवति । अकर्मशीलस्य बुध्दिस्तु परिपरिविधेन अनिश्चयेन सदा चञ्चला भवति। तस्मात् अलसत्वं मा भवेत् इति । "कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्" अस्मदीयाः पूर्वजाः सदा कर्म कुर्वन्ति स्म । तान् आदर्शेन स्वीकृत्य त्वमपि सदा कर्म कुरुतात्। **"न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्"** । न केनापि कर्मशून्यत्वेन क्षणमपि स्थातुं शक्यते। **"न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते"** इति। कर्म अकरणेन निष्कर्मता न प्राप्नुवन्ति। **"कर्मणैव हि संसिध्दिमास्थिता जनकादयः। लोकसंग्रहमेवापि सम्पश्यन्कर्तुमर्हसि"** जनकादयः रजान अपि कर्म कुर्वन्नेव सिध्दिं प्राप्तवन्तः। लोककाल्याणार्थं कर्म करणीयम् । **"यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः। मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः"** आदर्शपुरुषान् श्रेष्ठाधिकारीन् उद्दिश्य वदति। अहं कदाचिदपि अजागरुकेण मोहवशाद् वा दोषभूयिष्ठं कर्म करोमि चेत् सर्वे जनाः मामेव अनुचरिष्यन्ति। तस्मात् सावधानेन कर्म करणीयम् । कथं मनुष्याः सन्मार्गात्पतिष्यन्तीति विषयपरम्पराप्रपञ्चं वर्णितं यथा -

**"ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥**
**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति" ॥**





प्रथमं पुरुषः विषयचिन्तनं करोति। विषयचिन्तनादासक्तिरुत्पद्यते। आसक्तितः अभिरुचिः प्रजायते। यदि इच्छा पूर्णा न भवति तदा क्रोधोऽभिजायते। कोपेन मोहितः भवति, सम्मोहेन स्मरणशक्तिः विकला भवति। स्मृतिनाशेन बुद्धिरपि विनश्यति। बुद्धिनाशेन सर्वप्रणाशः भवति। सर्वं निष्फलं भवति। अयं विषयः सर्वमानवालिनं प्रति शिक्षां ददति। सर्वदा नकारात्मकस्मरणात् सुतरां दूरं स्थातव्यम्। सकारात्मकचिन्तनेन जीवनं साफल्यं कारणीयम्।

सुखेषु दुःखेषु च समत्वभावेन वर्तितव्यम्। तथा लाभे अलाभे च व्यापारवेत्तारः कृषीवलाः समभावेन भवितव्यमिति।**"जयाजयौ"** कार्यसफलत्वे असफलत्वे च क्रीडाकाराः, अन्ये च समत्वं अनुभवेयुः इति। **"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः"** दुःखसमये आवेशरहितेन सुखसमये च निराशमयमनस्केन न स्थातव्यम्। अहिंसा, सत्यं, अक्रोधः, शान्तिः, दया, रुजुत्वभावम् इत्यादयः सर्वमानवालिम् उद्दिश्य प्रवर्तन्ते। एते गुणाः सर्वेषु सम्पन्नाः भवेयु इति प्रबोधयति। अस्मद्देशस्वातन्त्र्यात् पूर्वं पालनविधिः 'राज्यांगम्' न आसीत्। तदा कुत्रत्यनियमानवलम्ब्य जीवनं यापयन्ति ? इति प्रश्ने सति, तदा गीताशास्त्रं मुख्यभूमिकां दधार। तदर्थमेव अद्यतनकालेऽपि न्यायालये मुख्यशपथरूपेण तमनुश्रुत्यैव कारयन्ति। पञ्चसहस्रवत्सरपूर्वमेव अस्य ग्रन्थस्य उद्भवः अभवत्। तथापि अद्यावधि नवनवनीतवत् सर्वजनप्रियम् अभवत्। इति शम्।

## सन्दर्भ संकेत -


1- गीतामाहात्म्यम्।
2- गीता ३.२१।
3- गीता ४.३४।
4- गीता ५.१८।
5- गीता ४.४०।
6- गीता ३.२९।
7- गीता १७.१५।
8- गीता ५.१८।
9- गीता. ३.२५।
10- गीता २.४।
11- गीता २.३१।
12- गीता. ३-८
13- गीतामहत्म्यं
14- गीता. २-४१।
15- गीता-३-५ ।
16- गीता -३-४।
17- गीता -३-२०।
18- गीता-३-२३ / ४-४१।
19- गीता २.६२,६३।